This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit. The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

M-211

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय ग्रंथालय

हस्तलिखित संग्रह

दाखल क्र. M211 विषय धर्मशास्त्र

नांव धर्मशास्त्र निर्णय Mss.

लेखक / लिपीकार —

पृष्ठ 23 काळ — पूर्ण / अपूर्ण

Checked 2012

M-211

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुनः संधानेमु८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ममगृह्याग्निविछिन्नादिनादारभ्य

प्रतिवर्षं एकैकप्राजापत्यंप्रतिप्राजापत्येनिष्कंप्राजापत्याम्नकंप्राकृत्यंयश्चित्तं

श्रीगणेशायनमः॥ अथविछिन्नस्यगृह्याग्नेःपुनःसंधानं॥ ॥आचम्यप्राणानायम्य
देशकालौस्मृत्वा एतावंतंकालंगृह्याग्निविछेदजनितप्रत्यवायपरिहारद्वाराश्रीप
रमेश्वरप्रीत्यर्थं अमुकप्रायश्चित्तं अमुकप्रत्याम्नायद्वारायथाशक्तियथाकालंकरि
ष्ये॥ पुनरग्निविछेदेनलुप्तानांसायंप्रातर्होमानांतथादशपूर्णमासस्थालीपाकानांव
यथाशक्तिव्रीह्यादिरूपंद्रव्यं आज्यंवनानानांगोत्रेभ्योब्राह्मणेभ्योदातुमहमुत्सृजे
॥ममविछिन्नस्यगृह्याग्नेःपुनःसंधानाख्यंकर्मकरिष्ये॥ तदंगंस्थंडिलादिसक
लंकर्मकरिष्ये॥ अग्निध्यानांतंकृत्वा॥ क्रियमाणेपुनःसंधानहोमेदेवतापरिग्रहा
र्थमन्वाधानंकरिष्ये॥ अस्मिंनन्वाहितेग्नौजातवेदसमाग्निमिध्मेनप्रजापतिंप्रजाप
तिंचाघारदेवताआज्येनात्रप्रधानं॥ अग्निंपवमानंसकृदग्निंप्रजापतिंचाज्येनअ
र्यमाग्निंवरुणाग्निंपूषाग्निंप्रजापतिंचलाजद्रव्येणसूर्यासावित्रींचतुर्वारमाज्येनशे १

षेणास्विष्टकृतामित्यादिसद्योयक्ष्ये॥ परिसमूहनादिपूर्ववत्। पात्रासादनेविशेषः॥
प्रोक्षणीस्त्रुवौप्रणीताआज्यपात्रेइध्माबर्हिषिलाजशूर्पंचासादयेत्॥ आज्यसंस्काराद्
आघारांतंकृत्वाप्रधानाज्याहुतीर्जुहुयात्॥ अग्नआयूंषीतितिसृणांशतंवैखानसाऋष
यः॥ अग्निःपवमानोदेवता॥ तिसृणांगायत्रीछंदः॥ पुनःसंधानप्रधानआज्यहोमेविनि
योगः॥ ॐ अग्नआयूंषिपवसे० एवंत्रिः॥ अग्नयेपवमानायेदं० सर्वत्रत्यागः॥ त्वमर्यमा
वसुश्रुतोग्निस्त्रिष्टुप्॥ पुनःसंधानप्र० ॐ त्वमर्यमाभवसि० कृणोषिस्वाहा॥ अग्नयइदं०
प्रजापतेहिरण्यगर्भःप्रजापतिस्त्रिष्टुप्॥ पुनःसंधानप्र० ॐ प्रजापते० रयीणांस्वाहा॥
प्रजापतयइदं० अथपत्न्याःक्षालितेंजलौपतिराज्येनोपस्तीर्यद्विर्लाजानोप्यपंचावत्ती
तुचेत्त्रिरोप्यशूर्पस्थानभिघार्यांजलिस्थानप्यभिघार्यातिष्ठंत्॥ तिष्ठंत्याअंजलिंस्वकराभ्यां
धृत्वा॥ अर्यमणंवरुणंपूषणमितितिसृणांवामदेवोर्यमाग्निर्वरुणाग्निःपूषाग्निरनु
ष्टुप्॥ पुनःसंधानप्रधानलाजहोमेविनियोगः॥ अर्यमणंनुदेवंकन्या० पुनःस्वाहा॥ अर्यमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्नयइदं॰ वरुणंनुदेवं॰ वरुणाग्नयइदं॰ पूषणंनुदेवं॰ पूषाग्नयइदं॰ अर्यमणंकोपोनाशि
ष्टान् ताजानुत्वाप्रजापतयइदं॰ मनसास्मरन्॥ आनःप्रजामितिचतसृणां सूर्यासावित्री
आद्याजगती द्वितीयात्रिष्टुप् अत्येद्वे अनुष्टुभौ॥ पुनःसंधानप्रधानआज्यहोमे विनियोगः
ॐ आनःप्रजांजनयतुप्रजापतिः॰ चतुष्पदेस्वाहा॥ सूर्यासावित्र्याइदं॰ ॐ अघोरचक्षुः॰ इमां
त्वमिंद्रमीढ्वः॰ ॐ सम्राज्ञीश्वशुरेभव॰॥ समंजंत्वित्यस्यसूर्यासावित्री त्रिष्टुप्। हृदयांज
नेविनि॰ ॐ समंजंतु विश्वे॰॥ स्विष्टकृदादिहोमशेषंसमापयेत्॥ ॥इतिपुनःसं
धानं॥ ॥अथगर्भाधानं॥ रजोदर्शनात्षोडशाहोरात्राणि ऋतुस्तन्मध्ये आद्यंरात्रिचतु
ष्कंपर्वादिनिषिद्धदिनानिचवर्जयित्वा॥ मघामूलादिव्यतिरिक्तशुभकाले दंपत्योश्चंद्रानुकू
लेगर्भाधानंकार्यं॥ तत्रापियुग्मासुरात्रिषु पुत्राः अयुग्मासुकन्याजायंते इत्यादिज्ञेयं आ
चम्यप्राणानायम्यदेशकालौसंकीर्त्य अस्याःममभार्यायाः प्रतिगर्भसंस्कारातिशयद्वारा शिव
अस्यांजनिष्यमाणसर्वगर्भाणां बीजगर्भसमुद्भवैनोनिबर्हणद्वाराश्रीपरमेश्वरप्रीत्यर्थंग ॥२॥

मातृकापूजनं

र्भाधानाख्यंकर्मकरिष्ये॥ तदंगं गणपतिपूजनं पुण्याहवाचनं नांदीश्राद्धं चकरिष्ये॥ देशका
लौसंकीर्त्य॥ समिद्वयमादाय गर्भाधानंकर्तुंप्राजापत्यहोमंकरिष्ये॥ तत्रदेवतापरिग्रहार्थमित्या
दिचक्षुषीआज्येनेत्यंतमुक्त्वा प्रजापतिंवरुणाविष्णुंपञ्चवारमाज्येन प्रजापतिंचाज्येनशेषेणस्वि
ष्टकृतमित्यादिसद्योयक्ष्ये त्यंतमुक्त्वा समिद्वयमादायपरिसमूहनादि पूर्णपात्रनिधानांतं
कृत्वा प्रजापतयेत्वाजुष्टं निर्वपामीत्यादि आज्यभागांतंकृत्वा अवदाय ॐ प्रजापतयेस्वाहे
ति चरुणैकाहुतिंकृत्वा प्रजापतयइदं॰ विष्णुर्योनिमितितिसृणां त्वष्टा विष्णुरनुष्टुप्॥ गर्भा
धानप्रधानआज्यहोमे विनियोगः ॐ विष्णुर्योनिंकल्पयतु॰ तुतेस्वाहा विष्णवइदं॰ ॐ गर्भं
धेहिसिनीवालि॰ स्वआस्वाहा विष्णवइदं॰ हिरण्ययीअरणीयं॰ सूतवेस्वाहा विष्णवइदं॰ नेज
मेषेतितिसृणांत्वष्टाविष्णुरनुष्टुप् गर्भाधानप्रधानआज्य॰ ॐ नेजमेषपरापत॰ पुमान्स्वा
हा विष्ण॰ ॐ यथेयंपृथिवी॰ विष्णइदं॰ ॐ विष्णोश्रेष्ठेनरूः॰ विष्णव॰ प्रजापतेहिरण्यगर्भः
प्रजापतिस्त्रिष्टुप् गर्भाधानप्र॰ ॐ प्रजापतेनत्व॰ प्रजापतयइदं॰ एवंसप्ताहुतीर्हुत्वा॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपनः शोशुचदघमित्यस्यसूक्तस्य कुत्सोग्निर्गायत्री पत्न्यामूर्द्धाभिमर्शने विनियोगः ॐ अ
पनः शोशुचदघं० वर्ग याः फलिनीरित्यस्याथर्वणो भिषग्गोमधयोनुष्टुप् पत्न्यामूर्द्धा०
ॐ याः फलिनीर्या० सकृ० तांत्रापिला वधेनदस्युमितित्रिषणां वसुश्रुतोग्निस्त्रिष्टुप् अग्न्युप
स्थाने।०।ओं वधेन दस्युंप्रहिव्रातयस्व० वर्ग अग्निस्तुविश्रवस्तममितिद्वयोर्वसूयवोग्निर
नुष्टुप् अग्न्युपस्था० अग्निस्तुवि० सकृ० अग्निर्ददातिसत्पतिं० सकृ इत्यष्टाभिरग्निमुपस्था
य।स्विष्टकृतादिहोमशेषंसमाप्य सूर्योनो।दिवस्पात्विति पंचर्चस्यसूक्तस्य सूर्यश्चक्षुः सू
र्योगायत्री सूर्योपस्थाने वि० वर्ग अनेन सपत्नीकः सूर्यमुपस्थाय अश्वगंधाकल्कं दूर्वाकल्कं
वा सूक्ष्मवस्त्रेनिक्षिप्य उदीर्ष्वेतिद्वयोः सूर्यासावित्री सूर्यासावित्री आद्या त्रिष्टुबंत्यानुष्टु
प् भार्याया दक्षिणनासापुटे अश्वगंधारससेचने विनियोगः ॐ उदीर्ष्वातः पतिवती ह्येष्३ पा०
सकृ द्वय गंधर्वस्य विश्वावसोर्मुखमसीतिमंत्रेण होमो कल्पनात् दशभिर्विष्णुर्योनिमिति तिसृ
भिस्त्रिभिरंगुलीभिर्योनिमभिमृश्य तां पूषानित्यस्य सूर्यासावित्री सूर्यासावित्री त्रिष्टुप्।।

शिव ।विष्णु''

जपे विनियोगः।ॐ तां पूषंछिवतमा० सकृ। योगर्भमोषधीनामित्यस्य वसिष्ठः पर्जन्यो गायत्री जपे०
ॐ योगर्भमोषधीनां० सकृ अहंगर्भमभजावान्प्राजापत्योगर्भ इंद्रो वा त्रिष्टुप् जपे० ॐ अहं
गर्भमदधामोषधी० सकृ इतिसकृदुपस्थेत्। ततः प्राणो रेतोदधाम्यनुकशर्मा यथाग्निरग्नि
र्गर्भिण्यथा द्यौरिंद्रेणगर्भिणी वायुर्यथा दिशांगर्भ एवं तेगर्भं दधामि अनुकशर्मेति मध्यमैक
वर्षभोंतं स्वं नाम वदेत् स्त्री हृदमभिमृश्य वामेत् इदानीं नेस्यं।शिष्टो दत्तैव स्विष्टकृतादि
होमशेषं समापयंति कृतस्य गर्भाधानस्य कर्मणः सांगता सिध्यर्थं यथाशक्ति ब्राह्म
णान्भोजयिष्ये तथैव भूयसीं दक्षिणां दत्वा कर्मेश्वरार्पणं कुर्यात् एतत्कर्माकरणे प्रायश्चि
त्तमाहाचार्यः गर्भाधानस्याकरणात्तस्यां जातस्तु दुष्यति अकृत्वा गां द्विजे दत्वा कुर्यात्पुं
सवनं पातितिति इतिगर्भाधानं अथ पुंसवनाः नयलोभन सीमंतोनयन कर्मणां प्रयोगः
।। ।। अथ। नियमकालस्तु गुरुभुक्त्वास्तवाल्यवार्द्धकमलमासादिदोषरहितका
लाभे तु भुक्तास्तादौ न कार्यं।। सीमंतदिने वा कार्यं मंगलस्नानादि भूषणभूषितो भार्यां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वदक्षिणतउपविश्य देशकालौस्मृत्वा अस्यां भार्यायां मुत्पत्स्यमानानां गर्भाणां बैजिकगार्भि
कदोषपरिहाररूपताज्ञानोदयप्रतिरोधिपरिहारद्वारातनुरुधिरप्रियालक्ष्मीभूतराक्ष
सीगणदूरनिरसनक्षेमसकलसौभाग्यनिदानभूतमहालक्ष्मीसमावेशनद्वाराप्रतिग
र्भंबीजगर्भसमुद्भवैनोबर्हणजनकातिशयद्वाराचश्रीपरमेश्वरप्रीत्यर्थंस्त्रीसंस्काररूपं
पुंसवनाऽनवलोभनसीमंतोंनयनाख्यानिकर्माणिकरिष्ये॥ तदादौ।निर्विघ्नतासिध्य
र्थंगणपतिपूजनंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंचकरिष्ये॥ तउक्तं ब्रह्मपुराणे
॥ गणाशः क्रियमाणानांमातृभ्यः पूजनंसकृत् सकृदेवभवेछ्राद्धंमादौनपृथगादिषु॥ ततो
विधिवदौपासनाग्निंपवमानसंज्ञंप्रज्वाल्य॥ क्रियमाणेअनवलोभनसीमंतोंनयन
होमेदेवतापरिग्रहार्थमन्वाधानंकरिष्ये॥ अस्मिन्नन्वाहितेग्नौजातवेदसमाग्निमिध्मेनप्र
जापतिंप्रजापतिंचाघारदेवतेआज्येनाग्नीषोमौचक्षुषीआज्येनात्रप्रधानंप्रजापतिंचस
णा[illegible]द्विर्धारिद्विराकांत्रिर्बिल्लुंप्रजापतिंचाज्यद्रव्येणशेषेणस्विष्टकृतमग्निमिध्मसंनहने॥
ता

शिव ॥४॥

परिसमूहनपरिस्तरणादिप्रणीताप्रणयनांतंकृत्वाप्रजापतयेत्वाजुष्टंनिर्वपामीतिचतु
रोव्रीहिमुष्टीन्निरूप्य तथैवप्रोक्ष्य अवघातादिबर्हिषिहविरासादनांतंकृत्वा स्वदक्षिणतः
पत्नीमुपवेश्यतथान्वारब्धइध्मानौभिघार्याज्यभागांतंकृत्वा प्रक्षालितेप्रस्ततीकृतेपत्नी
पाणौप्रस्तृतिमितंगोर्दधिनिक्षिप्यतदुपरिलिंगवद्यवंतस्यार्भन्योरडद्वयंचमाषद्वयं
चनिधाय किंपिबसीतित्रिःपत्नींपृच्छेत्।साचपुंसवनमिति।त्रिरुक्त्वा निःशेषंपिबाजकृमाच
म्यपुनरेवंद्विः।एतत्पुंसवनं॥ ॥ततोपत्न्यादक्षिणनासाबिलेदूर्वारसंसिंचेत् तत्रप्रजावदु
रव्यंसूक्तं॥ आतेगर्भोयोनिमैतुपुमान्बाणइवेषुधिं।आवीरोजायतांपुत्रस्तेदशमास्यः॥
करोमितेप्राजापत्यमागर्भोयोनिमैतुते अनूनःपूर्णोजायतामश्लोणोपिशाचधीतः
पुमांस्तेपुत्रोनारितंपुमाननुजायतां तानिभद्राणिबीजानिऋषभाजनयंतिनौ॥ यानिभ
द्राणिबीजानिऋषभाजनयंतिनः।तैस्त्वंपुत्रान्विंदस्वसाप्रसूर्धेनुकाभव कामःसमृध्य
तांमह्यमपराजितमेवमे। यंकामंकामयेदेवतन्मेवायोसमर्धय अथजीवत्पुत्रारव्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूक्तं॥ ॥अग्निरैतु प्रथमो देवतानां सोस्यै प्रजां मुंचतु मृत्युपाशात् तदयं राजा वरुणो
नुमन्यतां यथेयं स्त्री पौत्रमघं न रोदात् इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दी
र्घमायुः अशून्योपस्था जीवतामस्तु माता पौत्रमानंदमभिप्रबुध्यतामियं मा ते गृहे निशि
घोष उत्थाद्न्यत्र त्वद्रुदत्यः संविशंतु॥ मा त्वं विकेशिर आवधिष्ठा जीवपत्नी पतिलोके विप
श्यंती प्रजां सुमनस्यमाना अप्रजस्त्तां पौत्रमृत्युं पाप्मानमुत वाघं शीर्ष्णस्स्रजमिवोन्मुच्य
द्विषद्भ्यः प्रतिमुंचामि पाशं देवकृतं ब्राह्मणकल्पमानं तेन हान्मि योनिषदः पिशाचात्
क्रव्यादो मृत्यून् अधरान्पातयामि दीर्घमायुस्तव जीवंति पुत्राः एतैर्दशभिर्मंत्रैर्नस्येदन्ने
आनीतजलं पत्न्यास्य दद्यात् ततः अवदानधर्मेण अवदाय प्रजापतये स्वाहेत्येकाहुतिं हुत्वा
यत्ते सुशीम इति मंत्रेण पत्न्या हृदयदेशं पाणिनास्पृशेत् यत्ते सुशीम इति मंत्रस्य हिरण्यग
र्भः प्रजापतिरनुष्टुप् भार्याया हृदयालंभने विनियोगः यत्ते सुशीमे हृदये हितमंतः प्रजा
पतौ मन्येहं मां तद्विद्वांसं माहं पौत्रमघं नियां धाता ददातु दाशुष इति मंत्रद्वयस्य हिरण्यगर्भो शिव ॥५॥

आज्य
धाता अनुष्टुप्॥ द्वितीयात्रिष्टुप् सीमंतोन्नयनप्रधानं होमे विनियोगः ॐ धाता ददातु दाशुषे
प्राचीं जीवातुमक्षितां वयं देवस्य धीमहि सुमतिं वाजिनीवतः स्वाहा धात्र इदं० धाता प्रजानामुत
राय ईशे धातेदं विश्वं भुवनं जजान॥ धाता कृष्टीरनिमिषाभिचष्टे धात्र इद्धव्यं घृतवज्जुहोतं स्वा
हा॥ धात्र इदं० राकामहमिति द्वयोर्गृत्समदो राका जगती सीमंतोन्नयनप्रधानआज्यहोमे० ॥
ॐ राकामहं सुहवां० सुष्टुत्या स्वाहा राकाया इदं० ॐ यास्ते राके सुमतयः० ररराणा स्वाहा॥ राकायै०
नेजमेषेत्यादि मंत्रत्रयस्य त्वष्टा विष्णुरनुष्टुप् सीमंतोन्नयनप्रधानं० ॐ नेजमेष परापत०
स्वाहा विष्णव इदं० यथेयं पृथिवी० विष्णव इदं० विष्णोः श्रेष्ठेन० स्वाहा विष्णव० प्रजापते हिरण्य
गर्भः० स्वाहा प्रजापतय इदं० ततः पत्न्याः पश्चिमतस्तिष्ठन् प्रोष्ठिखासीनं पक्वमौदुंबरस्त
बकद्वयं त्रिः शुक्लां शलली कुशांकुरत्रयं चैकीकृत्य तन्मूलेन पत्न्याः केशलला टयोः संधि
मारभ्य मूर्धप्रदेशगात् ॐ भूर्भुवः स्वरोमिति मंत्रेणाग्निमतुर्वारं प्रत्युन्नयनं मंत्रो वर्तय
सीमंतमुन्नयेत् भूर्भुवः स्वरिति मंत्रस्य प्रजापतिः प्रजापतिर्बृहती सीमंतव्यूहने विनियोगः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सोमंराजानंसंगायेतां इति प्रेषयेत् सोमोनोराजा वतु मानुषीः प्रजा निविष्टचक्रासौ गंगे इत्या
दिसमीपस्थानद्यः संबुध्य तं नाम निर्दिश्य तौ वीणया गायेतां सामगानपरिज्ञाने मंत्रमा
त्रं ताभ्यां पठेतां ततः स्विष्टकृतादिहोमशेषं समाप्य कृतानां पुंसवनानवलोभनसीमंतोन्न
यनकर्मणां सांगतासिद्ध्यर्थं ब्राह्मणे अनदुहत्सु प्रतिनिधिभूतं यथाशक्ति द्रव्यं दातुमहमु
त्सृजे ब्राह्मणाभावे ब्राह्मणेभ्यः दास्ये कृतानां कर्मणां सांगतासिद्ध्यर्थं यथाशक्ति ब्राह्म
णान् यथाशक्ति भोजयिष्ये यथाशक्ति भूयसीं दातुमहमुत्सृजे कर्मेभ्यो दार्पयां कुर्यात्
यस्य स्मृत्येत्यादि विष्णुस्मरणं कार्यं ततः ब्राह्मण्याभ्य इच्छाया जीवपत्नीः जीवप्रजाया यथ
कुपदिशेयुस्तत्कुर्युः॥ ॥ इति पुंसवनानवलोभनसीमंतोन्नयनकर्म समाप्तं॥ ॥
अकृतसीमंतायाः प्रसवे विशेषः॥ सत्यव्रतेनोक्तः स्त्रीयदा कृतसीमंता प्रसूयेत कथंचन॥
पुत्रं गृहीत्वा विधिवत्पुनः संस्कारमर्हति॥ ॥ अथ विष्णुबलिः॥ गणपतिस्मरणं कृत्वा देशका शिव ॥६॥
लौ स्मृत्वा गुर्विण्या मम पत्न्या गर्भस्य निर्बाधपरिपोषणपूर्वकसुप्रसूतिसिद्ध्यर्थं गर्भाधि

प्रीति
देवता विष्णुप्रीतिकामोहं विष्णुबलि नाम कर्म करिष्ये॥ तदादौ निर्विघ्नतासिद्ध्यर्थं गणपतिपूजनं पु
ण्याहवाचनं मातृकापूजनं नांदीश्राद्धं च करिष्ये॥ स्थंडिले गृह्याग्निं प्रतिष्ठाप्य॥ क्रियमाणे विष्णुबलि
होमे देवतापरिग्रहार्थमित्यादि चक्षुषी आज्येनेत्यंतमुक्त्वा विष्णुं प्रधानदेवतां चरुणा षड्विवारं चरुणा
शेषेण स्विष्टकृतमित्यादि॰ अन्वाधाय परिसमूहना ज्यसंस्कारांतं पात्रांतरे। सिद्धं चरुमा
याग्नावभिघार्य त्वाभिघार्योदगुद्वास्याज्यादक्षिणतो बर्हिष्यासाद्योपस्तरणाभिघारणाज्यभागां
तं कृत्वा दक्षिणतोग्नेः स्थंडिले अष्टदलपद्मं स्वस्तिकं वा प्रकल्प्य तत्र विष्णुमावाह्य षोडशभिरुप
चारैरभ्यर्च्य पुनर्यथासनमासित्वा पत्न्यान्वारब्धो वदानधर्मेण चरुमवदाय स्रुवा चतुःपाद्यं
मंत्रैभ्यस्तु षष्ठीमाहुतीर्जुहुयात्॥ तत्रायं क्रमः। अतो देवा इति षण्णां चस्य मेधातिथिर्विष्णुर्गा
यत्री विष्णुबलिप्रधानचरुहोमे विनियोगः॥ ॐ अतो देवा अवंतु नो॰ स्वाहा। विष्णव इदं॰ गरि
विष्णोर्नुकमिति सप्तदशर्चस्य सूक्तस्य उचथ्यपुत्रो दीर्घतमा विष्णुः प्रथमं सूक्तं त्रैष्टुभं द्विती
यस्तृतीये जगती। विष्णुबलिप्रधान॰ ॐ विष्णोर्नुकं वीर्याणि प्रवोचं॰ रुणायः स्वाहा विष्णवे इदं॰ वर्गाणि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संवामित्वए र्वस्य सूक्तस्य भरद्वाजो विष्णुस्त्रिष्टुप् विष्णुबलिप्रधानचरु० ॐ सवां कर्मणा०
पारयंता स्वाहा विष्णवेदं० वर्ग परोमात्रेति वर्गद्वयस्य वासिष्ठो विष्णुस्त्रिष्टुप् विष्णुबलिप्रधा०
ॐ परोमात्रया तन्वा वृधान० विष्णवे स्वाहा विष्णवेदं० वर्गद्वय सहस्रशीर्षेति षोडशर्चस्य
सूक्तस्य नारायण ऋषिः जगद्बीजपरमपुरुषो देवता पंचदश्योनुष्टुभो त्या त्रिष्टुप् वि
ष्णुबलिप्रधानचरु० ॐ सहस्रशीर्षा पुरुषः० गुलं स्वाहा विष्णवइदं० वर्गत्रीणि विष्णुर्योनिमि
ति त्रचस्य सूक्तस्य हिरण्यगर्भो विष्णुरनुष्टुप्॥ विष्णुबलिप्रधानचरु० ॐ विष्णुर्योनिं कल्पयतु०
स्वाहा विष्णु० गर्भं धेहि० स्वाहा स्वाहा विष्णु० हिरण्ययी अरणी यं० सूतवे स्वाहा विष्णु० प्रणवाद्यैः
स्वाहांतान् चतुःषष्टिमंत्रैश्चतुःषष्ट्याहुतीर्हुत्वा अनंतरमग्नेरीशान्यां स्थंडिले चतुःषष्टिप
दं सितेन रजसा मंडलं कृत्वा तेषु पदेषु नैर्ऋतिपश्चादिक्रमेण प्रथमं बाल्हस्तौ ततस्तथैवानंत
राशानिषु व भागुन्न चतुःषष्टिमंत्रैः प्रणवाद्यैः स्वाहांतैः प्रादक्षिण्येन चरुशेषेण बलिं दत्वा स शिव
र्वान्विष्णु तन्मंडलमध्ये ॐ नमो नारायणायेति येन मंत्रेण बलिं दत्वा पूर्ववत्स्य कृतेनैव मंत्रेणा ॥ ७ ॥

घं
वदत्वा बलिविशेषात् किं विदन्नमादाय पिंडद्वयं कृत्वा यथाशक्ति ब्राह्मणान् भोजयित्वा दंपती
भुंजीयातां॥ ॥अयं च विष्णुबलिः॥ ॥प्रतिगर्भमावर्तते॥ प्रतिगर्भं बलिः कार्यः॥ सीमंतश्च
प्रशस्यते इत्यंबगर्भस्य सूत्रानुक्तत्वादिदं तैत्तिरीयशाखानावरंति॥ ॥इत्याश्वलायनोक्तेः॥ इति विष्णु
बलिप्रयोगः॥ ॥जातमात्रे पुत्रे पिता मुखं निरीक्ष्य नद्यादावंमुखस्नात्वा असंभवे दिवाहृ श्रु
ताभिः शीताभिरद्भिः सुवर्णयुताभिर्गृहे एव स्नात्वा आचम्य प्राणानायम्य देशकालौ संकीर्त्य
स्य कुमारस्य गर्भांबुपानजनितसकलदोषनिबर्हणायुर्मेधाभिवृद्धिबीजगर्भसमुद्भवैनोनिब नो
निबर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं जातकर्म करिष्ये॥ इति संकल्प्य॥ तदादौ निर्विघ्नतासिध्य
र्थं गणपतिपूजनं पुण्याहवाचनं मातृकापूजनं हिरण्येन नांदीश्राद्धं कृत्वा ततो विषममानेन
मधुसर्पिषी मिश्रीकृत्य शिलातले निक्षिप्य सुवर्णेनावघृष्य सुवर्णादिभाजनेन निधाय॥ ॐ प्र
ते ददामि मधुनो घृतस्य वेदं सवित्रा प्रसूतं मघोनां॥ आयुष्मान् गुप्तो देवताभिः शतं जीव शरदो लो
के अस्मिन्निति मंत्रेण तेनैव हिरण्येन कुमारं पाययित्वा तद्धिरण्यं प्रक्षाल्य कुमारस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दक्षिणकर्णेनिधायतन्मुखसमीपेस्वमुखमानीय ॐ मेधांतेदेवः सविता मेधां देवी सरस्वती मे
धांते अश्विनौ देवावाधत्तांपुष्करस्रजौ स्वयंजपित्वा॥ पुनस्ताद्धिरण्यंसव्यकर्णेनिधायैतामेव
मर्यंजपेत्॥ ततः शिशोरंसौयुगपदभिमृशेत्॥ अश्माभवपरशुर्भवहिरण्यमस्तृतंभव॥ वेदोवै
पुत्रनामासिसजीवशरदः शतमितिमंत्रेण॥ इंद्रश्रेष्ठानिगृत्समद इंद्रस्त्रिष्टुप्॥ अंसावभिम
र्शनेविनियोगः॥ ॐ इंद्रश्रेष्ठानिद्रविणानिधेहि चित्तिंदक्षस्यसुभगत्वमस्मे॥ पोषंरयीणाम
रिष्टिंतनूनांस्वाद्मानंवाचः सुदिनत्वमह्नां॥ अस्मेप्रयंधिविश्वामित्रइंद्रस्त्रिष्टुप्॥ अभिमर्श
ने०॥ ॐ अस्मेप्रयंधिमघवन्नृजीषिन्निंद्ररायोविश्ववारस्यभूरेः॥ अस्मेशतंशरदोजीवसेधा
अस्मेवीरांछश्वतइंद्रशिप्रिन्॥ मंत्राभ्यांचाभिमर्शः॥ ततः शिरोः करिष्यमाणनामुन्तदेव
स्मरेत्॥ मूर्द्धनिरवघ्राय॥ ततः इमां कुमारोजरांधयतुदीर्घमायुः प्रजीवसे अस्मेस्तनो
प्रभुंजामा आयुर्वर्चोयशोबलं॥ इतिमंत्रेण कुमारंपाययित्वा ततोजन्मलग्नदुष्टस्थानस्थित
ग्रहजपीडानिवृत्यर्थंमनेन पूगीफलेन ताम्हंहृणे यथाशक्ति नपंचकारयेत्॥ कृतस्यजा
तकर्मणः सांगतासिध्यर्थं यथाशक्तिभूयसीं दक्षिणां दातुमहमुत्सृजे॥ ब्राह्मणैः आशीर्वाचयेत्॥

शिव ॥८॥

अगाटमा नकू

ॐ तमर्यंतिनसानसि० वर्ग कुमार्याश्चैतज्जातकर्मा॥ मिंत्रकंकार्यं रात्रौसंध्यायांग्रहणेजा
ताशौचातरमध्येपीदंकार्यं॥ मृताशौचमध्येजातश्चेत्तद्देवाशौचांतेवाकार्यं पितरियामांत
रेगतेपि पितृव्यादिगोत्रजोज्येष्ठक्रमेण दंकुर्यात्॥ ॥इतिजातकर्म॥ ॥अथषष्ठीपूजा॥
अस्य॥ आचम्यप्राणानायम्यदेशकालौसंकीर्त्य अस्याशिशोरायुरारोग्यसकलारिष्टश
ति द्वारांविघ्नेशस्यजन्मदानांषष्ठीदेव्याजीवंतिकायाश्चवरुणसहितंनयथामीलितोपचा
रैरावाहनाद्यर्चनिपूजनंवकरिष्ये॥ तदंग आत्मशुध्यर्थंन्यासांश्चकरिष्ये॥ वरुणपूजनं
ॐ स्य यत्साद्भगवतीहि० गणानांत्वागणपतिं० संकू। तत्त्वायामि० तकू॥ तेनैवमंत्रेणषोडशोप
चारैः पूजयेत्॥ अथप्रार्थना॥ गौरीपुत्रोयथास्कंदः शिशुत्वेरक्षितः पुरा॥ तथाममाप्य
यंबालः षष्ठिकेरक्षितांनमः॥ कार्तिकेयमहाबाहोपार्वती हृदयनंदन॥ कुमारंरक्षमीति
भ्यः पाहिदेविनमोस्तुते॥ शक्तिस्त्वंसर्वदेवानांलोकानांहितकारिणी॥ मातर्बालमिमंरक्ष
महाषष्ठीनमोस्तुते॥ शांतिपाठः कर्तव्यः॥ कलशोदकेनअभिषेकः॥ सुरास्त्वामभिषि

भीपरमे
श्वरप्री
त्यर्थं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तुर्वासुदेवैर्मसेश्वरा॥१०॥ ॥इति षष्ठी पूजा॥ ॥अथ नामकरणप्रयोगः॥ ॥जन्म
एकादशे द्वादशे वा यथाचारं नियतदिने वा नामकरणं कार्यं नियतकालेपि विशिष्टवैधृतिव्य
तीपातग्रहणसंक्रान्त्यमावास्याश्राद्धदिनेषु न कार्यं॥ नियतकाले क्रियमाणे गुरुशुक्रास्त
बाल्यवार्द्धक्यवक्रातिचारमलमासादिनिषेधो नास्ति नियतकालातिक्रमे तु ज्योतिःशास्त्रो
क्ते शुभे काले कार्यं सर्वथा अत्र पूर्ववन्हः सर्वथा आचम्य प्राणानायम्य देशकालौ संकी
र्त्य अस्य शिशोर्बीजगर्भसमुद्भवैनोनिबर्हणायुरभिवृद्धिव्यवहारसिद्धिद्वारा श्रीपरमेश्वर
प्रीत्यर्थं नामकरणाख्यं कर्म करिष्ये॥ इति संकल्प गणेशपूजनादि नांदीश्राद्धांतं कृत्वा॥
नामलेखनं कार्यं॥ अत्रादौ गणपतिनाम ततो स्वकुलदेवताभक्त इति नाम कृत्वा तदनं
तरं मासनाम कार्यं॥ तद्यथा॥ कृष्णोऽनंतोऽच्युतश्चक्री वैकुंठोथ जनार्दनः॥ उपेंद्रो यज्ञपुरु
षो वासुदेवस्तथा हरिः॥ योगीशः पुंडरीकाक्षो मासनामान्यनुक्रमात्॥ चैत्रादिमार्गशीर्षा शिव ॥१२॥
दिषु क्रमशः॥ ततो नक्षत्रनाम ततो व्यवहारिकं नाम द्व्यक्षरं चतुरक्षरं कुमारनामलेख्यं

विप्रादिवर्णक्रमेण शर्मवर्मगुप्तदासान्यतमपदांतमुपांशु कुर्यात् ततो मौंजीबंधनान्माता
पितरावेव जानीयातां उपनयनकाले वानेन नाम्नाभिवादयेदिति कुमारं प्रति वाक्यं अत्रा
यं शिष्टाचारः तंडुलान्कांस्यादिपात्रे प्रसार्य तदुपरि सुवर्णशलाकया आदौ गणपति
नाम कुलदेवताप्रयुक्तनाम अमुकभक्त इति लेख्यं ततो मासनाम ततो नक्षत्रनाम लेख्यं॥
ततो व्यावहारिकं स्वेष्टं नाम शर्मांतं लिखित्वा ततोऽभिमित्रावरुणा गृहा पैप्रतिष्ठा॰ नामदेव तदस्तु
ताभ्यो नम इति उच्चारय वस्त्रादिभिः पूजां कुर्यात् मंत्रपुष्पांजलिं दत्वा कर्त्ता शिशोर्दक्षि
णकर्णे नामानि कथयेत् तेच कुलदेवतानाम्ना त्वं अमुकभक्तोसि मासनाम्ना त्वं कृष्णो
सि नक्षत्रनाम्ना त्वं चूडामणिरसि व्यावहारिकेण नाम्ना त्वं नारायणशर्मासि ततो ब्राह्म
णहस्ते अक्षतान्दत्वा कुलदेवतानाम्नायं दुर्गाभक्तो भवतः सर्वान्ब्राह्मणानभिवादये
प्रतिनाम्ने आयुष्मान्भवेति वदेयुः ततः कृतदेवताभ्यो ब्राह्मणेभ्यश्च नत्वा शिशोर्दत्वा
यथाविभवं विप्रान्भोजयेत् भूयसीं दक्षिणां दद्यात् कुमार्या अपि नामकरणमंत्रकं का

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यं॥ ॥इतिनामकरणं॥ ॥अथपर्यंकारोपणं तत्रनामकरणादिनेषोडशेद्वात्रिंशेत्य
स्मिन्वाज्योतिःशास्त्रोक्त मृदुध्रुवक्षिप्रनक्षत्रादियुक्तेशुभकालेयथाचारं कुलदेवतादि
पूजांविधायालंकृतांशिशुंहरिद्राद्यलंकृतेपर्यंकेमाताधात्रीवासौभाग्ययुक्ताःस्त्रियोयोगशा
यिनंहरिंस्मरंत्यागीतवाद्यादिसमकालंप्राक्शिरसंन्यसेयुः स्वस्वाचारप्राप्तंयदन्यदपिका
र्यं॥ ॥इतिपर्यंकारोपणं॥ ॥अथदुग्धपानं॥ ॥एकत्रिंशद्दिने द्वितीयजन्मनक्षत्रेवा
न्यस्मिन्वान्नप्राशननक्षत्रयुक्तेशुभदिनेकुलदेवतादिपूजांतेगोक्षीरंशंखेनधात्रीमातान्या
वाशुभगालंकृतंकुमारंदक्षिणाशिरसंप्राक्शिरसंवापाययेदिति॥ ॥इतिदुग्धपानं॥ अथक
र्णवेधः॥ ॥जन्मदिनाद्द्वादशेषोडशेवादिनेषष्ठसप्तमाष्टमदशममासान्यतरमासेन्यदावा
दंतजननात्पूर्वमेवज्योतिःशास्त्रोक्तमासशुक्लपक्षतिथिवारनक्षत्रादिशुभकालेपूर्वान्हेमु
ध्यान्हेवा विष्णुशिवब्रह्मचंद्रसूर्यदिग्गीशनासत्यसरस्वतीकुलदेवतागोब्राह्मणान्यथावि शिव
भवंसंपूज्यमातृत्संगस्थस्यालंकृतशुभासनस्थस्यवालंकृतस्यशिशोःकर्णयोःवेध्य ॥१०॥

स्थलमकृत्कृतकरसेनांकयित्वा यथाविभवंसुवर्णरौप्यताम्रलोहसूच्यामांगलिगद्वि
गुणपट्टादिसूत्रोपेतयासौविकेनान्येनतत्त्वाकुशलेनसुगात्रियावाप्राङ्मुखस्यवाक
र्णौविधयेद्दनारत्नेसूर्यरश्मिपातस्थलेंगणाचौपित्रादिकुमारस्यपूर्वंदक्षिणतःकुमार्या
स्तुपूर्वंवामः कर्णोवेधस्य॥ वेधननक्षत्रात्तृतीयनक्षत्रेकर्णक्षारुनमुख्लवारिणारोह
णार्थंकार्यं स्थूलोवकर्णोयथाभरणधारणक्षमताभवतितथाकर्तुंनीयो पुनःसूर्यरश्मिप्र
वेशयोग्यंरंध्रपर्यंतवर्धयेल्लंबकर्णतानुनिषिद्धा स्त्रीणांयथेच्छं॥ ॥इतिकर्णवेधः॥ ॥
॥सूर्यावलोकनं॥ ॥जननात्तृतीयेमासिजन्मदिनेजन्मनक्षत्रेवाइष्टदेवतापूजनपूर्व
कंअलंकृतेनशिशुनासौत्सवंसूर्यदर्शनंकारयित्वाचतुर्थमासेशुभकालेआग्निंचइंधेनुंच
दर्शयेत् कोविचु॥ स्वस्तिनआत्रेयो विश्वेदेवास्त्रिष्टुप् शिशोरंकारोपणेविनि० ॐस्वस्ति
नोमिमीता०। अनेनपित्रादिःशिशुमंकारोप्य आशुःशिशानइतित्रयोदशर्चस्याआप्रति
रथसूक्तस्यैंद्रोप्रातिरथइंद्रस्त्रिष्टुप् चतुर्थर्च्यस्यबृहस्पतिर्देवता त्रयोदश्यानुष्टुप् शिशोरायु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्या।मिदृध्यर्थंजपे०॥ॐ आभुः।शिशानो० १३ असौयासेनेतिद्वेपरिशिष्टखवोजपेत् तच्चक्षु
र्वा।सिद्धः सूर्यः पुरस्तुलिङ्।कुमारस्या।दित्यावेक्षणोविनियोगः॥ॐ तच्चक्षुर्देवहितं० रक्षूस्सूर्यं
।निरीक्षयेत् तृतीयेमासेसूर्यावलोकनं॥ नकारितंचे।त्निष्क्रमणेनैवसहकार्यं॥ इतिसूर्या
वलोकनं॥ ॥अथनिष्क्रमणं॥ चतुर्थेमा।सिशुक्लपक्षेशुभतिथ्यादौपितासहभार्यासह
शिशुरभ्यंगस्नातः देशकालौस्मृत्वाममास्य।शिशोरायुः श्रीवृद्धिबीजगर्भसमुद्भवैनो।निवर्ह
णद्वाराश्रीपरमेश्वरप्रीत्यर्थं।निष्क्रमणाख्यंकर्मकरिष्ये॥ इतिसंकल्प्य॥ तदंगंगणपतिपू
जनंस्वस्तिपुण्याहवाचनमातृकापूजनंआभ्युदेकान्निकृत्वा॥ इंद्रादिलोकपालानांआ च्यादिदि
शींचंद्रार्कवासुदेवगणानांचयथाक्रमंपूजांकृत्वा ब्राह्मणान्भोजयित्वाशिशुरलंकरणादिय
थाशक्त्यालंकृत्यअग्निचंद्रधेनूनांदर्शनंका।रयित्वावाद्यघोषयुक्तो॥ कनिक्रदज्जनुषमि
त्यादिशकुनादिसूक्तंगल्पसूक्तंपठेत् गृहाद्बहिर्गत्वामंत्रमेतमुच्चारयेत्॥ ॐकनिक्रदज्जनुषं०॥
॥१४॥

वर्गद्वय॥चंद्रार्कयो।दिगीशानां दिशांचवरुणस्यच॥।निक्षेपार्थमिमंदद्मितेत्वांरक्षंतुसर्व
दा॥ अप्रमत्तंप्रमत्तंवा।दिवारात्रौयथापिवा॥।रक्षंतुसततंसर्वेदेवाःशक्रपुरोगमाः॥।देवान्संं
प्रार्थ्यविष्णुशिवालययोरन्यतरं द्वंधुगृहेवागत्वा॥ तत्रदेवंसमेगत्वा प्रघोषंपुष्पोपहारादि
।भिः प्रपूज्यमहत्सुंजयमंत्रेणशिशोरक्षांकुर्यात्॥ अपूपादिभिः भूमेशागनगणेशं चाभ्यर्च्य।शि
शुंभक्ष्या।दिभिस्तोषयित्वा आशिषोवाचयित्वा देवप्रमाणंप्रदक्षिणनयंचशिशुनाकार
यित्वा मातुलमातृभगिनीगृहंनीत्वा तत्रदानोपहाराभः।शिशुंभक्ष्या।दिभिस्तोषयित्वा स्वगृ
हंगत्वा ब्राह्मणैराशिषोवाचयित्वा कृतस्यनिष्क्रमणाख्यस्यकर्मणः सांगता।सिध्यर्थंयथा
शक्तिभूयसींदक्षिणांदातुमहमुत्सृजे बंधुभिःसहभुंजीतेति कुमार्याअप्येतत्समानं॥ इति
संक्षेपेणोनिष्क्रमणप्रयोगः॥ ॥अथोपवेशनान्नप्राशनविधिः॥ ॥जन्मतःषष्ठेमा
सेअष्टमेवादंतेपुत्रायतेपुत्राज्योतिःशास्त्रोक्ततिथिनक्षत्रादिशुभकाले पूर्वाह्णेपित्रादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

।शिशोरन्नप्राशनं कुर्यात्॥ षष्ठे मासे वे क्रियते तदागुरुशुक्रमौढ्यादिदोषो अधिकमासादिदोषश्च नास्ति॥ ततः देशकालौ संस्मृत्वा ममास्याः शिशोर्मातृगर्भमलप्राशनशुद्ध्यन्नाद्य ब्रह्मवर्चसतेजेंद्रियायुर्लक्षणफलसिद्धिबीजगर्भसमुद्भवैनोनिबर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं उपवेशनान्नप्राशनं वतंत्रेण करिष्ये॥ तदादौ निर्विघ्नता सिध्यर्थं गणपतिपूजनं स्वस्तिवाचनाभ्युदयिकं कृत्वा ततो वाराहपृथिवीगुरुदेवद्विजान्पूजयित्वा॥ तत्र मंडलं कृत्वा धान्यराशिं कृत्वा शंखवत्त्यादि मांगलिकध्वनौ क्रियमाणे शिशुमुपवेशयेदेतैर्मंत्रैः॥ रक्षैनं वसुधे देवी सदा सर्वगतं शुभे॥ आयुःप्रमाणं निखिलं निक्षिप स्वहृदि प्रिये॥ अचिरादायुषस्त्वस्य ये केचित्परिपंथिनः॥ जीवितारोग्यवित्तेषु निर्दहस्वाचिरेण तान्॥ धारिण्यशेषभूतानां मातस्त्वमधिका ह्यसि॥ कुमारं पाहि मातस्त्वं ब्रह्मा तदनुमन्यतां॥ तदग्रे पुस्तकशस्त्रवस्त्रादिशिल्पानि विन्यस्य जीविकापरीक्षां कुर्यात्॥ शिशुः स्वेच्छया यत्प्रथमं स्पृशेत्तदास्य जीविके तोति विद्यात्॥ दधिमधुघृतमन्नं सुवर्णा शिव ॥१२॥

दिपात्रे निधाय अन्नपत इत्यस्य नलकुबेरोन्नपतिर्जगती॥ शिशोरन्नप्राशने विनि०॥ अन्नपते० अन्नं० इति मंत्रेण सुवर्णहस्तेनान्नमादाय प्राशयेत्॥ मुखं प्रक्षाल्य॥ अनयो रूपवेशनान्नप्राशनकर्मणोः सांगता सिध्यर्थं यथाशक्ति ब्राह्मणान्भोजयिष्ये॥ भूयसीं दक्षिणां दातुमहमुत्सृजे॥ कुमार्या अप्येतत् अमंत्रकं कार्यं॥ किंतु समे मासे॥ ॥ अथ वर्द्धापनविधिः॥ ॥ आदित्यपुराणे॥ सर्वैश्च जन्मदिवसे स्नातैर्मंगलवारिभिः॥ गुरुदेवाग्निविप्राश्च पूजनीयाः प्रयत्नतः॥ स्वनक्षत्रं च पितरस्तथा देवप्रजापतिः॥ प्रतिसंवत्सरं यत्नात्कर्त्तव्यश्च महोत्सवः॥ स्वनक्षत्रं स्वनक्षत्रदेवता स्वनक्षत्रं चित्तपश्चेति कवित्याठविनयः कुबेरः॥ अथ प्रयोगः॥ ॥ प्रतिवर्षं जन्मादिने सौरमीने जन्मनक्षत्रे वा मंगलस्नानं विधाय देशकालौ संकीर्त्य मम हृदूर्ध्वजन्मदिवसे आयुरभिवृद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं दूर्वाहोमं करिष्ये॥ तदंगं स्वस्तिपुण्याहवाचनं आदौ गणपतिपूजनं करिष्ये॥ तदंगं स्थंडिलादि करिष्ये॥ पुनर्देशकालौ संकीर्त्य समिद्धमादाय अस्मिन्दूर्वाहोमे देवतापरिग्रहार्थमन्वाधानं करिष्ये॥ अस्मिन्नन्वाहितेग्नावित्यादि चक्षुषी आज्येनेत्यंतमुक्त्वा प्रधानदेवता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मृत्युंजयमहोमरशतदूर्वाद्रव्येणशेषेणस्विष्टकृतमित्यादिसद्योयक्ष्येइत्यंतमुक्त्वासमिद्धय
मग्नावाधायपरिसमूह्यनाद्याज्यभागांतंकृत्वा दधिमधुघृताक्तंकेवलांन्वा दूर्वात्रयं त्र्य त्र्यायु
म्बकं वसिष्ठोरुद्रोनुष्टुप्॥ दूर्वाहोमेविनियोगः॥ ॐ हौंजूंसः ॐ भूर्भुवस्वः ॐ त्र्यम्बकंयजा
महे० ॐ स्वः भुवः भूः ॐ सः जूं हौं ॐ स्वाहा मृत्युंजयायेदं० इत्यनेनमंत्रेणाष्टोत्तरशतंजु
त्वास्विष्टकृतादिहोमशेषंसमापयेत् वासुदेवंनक्षत्रदेवतांवह्निंस्वनक्षत्रंवरुणंच यथोपचा
रैरभ्यर्च्य अथांतरेतु गणेशग्रहानिष्टदेवतांमार्कंडेयंचप्रार्थयेत् मार्कंडेयनमस्तेस्तु
सप्तकल्पांतजीवन॥ आयुरारोग्यसिध्यर्थंप्रसीदभगवन्मुने॥ चिरंजीवीयथात्वंतु भ
वरद्विज॥ कुरुष्वमुनिशार्दूलतथामांचिरजीवनं॥ मार्कंडेयमहाभागसप्तकल्पांत
जीवनः॥ आयुरारोग्यसिध्यर्थंअस्माकंवरदोभव॥ सतिलगुडसंमिश्रमंजल्यर्द्धमितं
पयः॥ मार्कंडेयाद्वरंलब्ध्वापिबाम्यायुर्विवृद्धये॥ इतिसतिलगुडमंजल्यर्धमितं शिव
पिबेत्॥ अश्वत्थामाबलिर्व्यासोहनुमांश्चविभीषणः॥ कृपःपरशुरामश्चसप्तैते ॥१३॥

चिरजीविनः॥ सप्तैतान्संस्मरेन्नित्यंमार्कंडेयमथाष्टमं॥ जीवेद्वर्षशतंसाग्रमपमृत्यु
विवर्जितः॥ ततोसुवासिनीभिर्नीराजितोघृतनूतनवस्त्रोब्राह्मणानभ्यर्च्य रूपपरिकामा
ज्यकुमुदादिप्रीतयेआयुर्वृद्ध्येचवायनादिदद्यात् ततोब्राह्मणान्भोजयित्वाआशिषोगृही
त्वा यथाशक्तितेभ्योदक्षिणांदद्यात्॥ एतत्सर्वंप्रतिवर्षंकुर्यात्॥ ॥इदंवर्द्धापनं॥ ॥
यदिजन्ममासोसंक्रांतस्तदाशुद्धमासएवकार्यंनत्वधिके॥ इतिसंक्षेपेणवर्द्धापनप्रयोगः॥ ॥
॥अथचौलोपनयनप्रयोगः॥ यदिगर्भाधानादिसंस्कारलोपस्तदाप्रायश्चित्तंकृत्वाकालात
यानिमित्तंप्रायश्चित्तहोमंकृत्वाचौलहोमःकार्यः॥ तदाहभगवान्॥ आरभ्याधानमाचौला
त्कालेतीतेतुकर्मणां॥ व्याहृत्याज्यंतुसंस्कृत्यकृत्वाकर्मयथाक्रमं॥ कार्यमितिशेषः॥
प्रायश्चित्तंवसएवाह॥ एतेष्वेकैकलोपेपिपादकृच्छ्रंसमाचरेत्॥ चूडायाअर्धकृच्छ्रंस्या
दापादित्येवमीरितं॥ अनापदीतुसर्वत्रद्विगुणं॥ द्विगुणंचरेत्॥ मनुः॥ जातकर्मादिसंस्का
राः॥ स्वकालेनभवंतिचेत्॥ चौलादर्वाक्प्रकुर्वीत प्रायश्चित्तादनंतरं॥ प्रायश्चित्तहोमे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तु

कृतेतत्कर्मकृताकृतं॥ तथावकारिका॥ ॥प्रायश्चित्ते कृतेपश्चादतीतमपिकर्मवै॥का
र्यमित्येकस्याचार्यानिंसम्यक्पिपाश्रितः॥ प्रायश्चित्तहोमस्तु प्रधानहोमात्पूर्वंसमस्तव्या
हृतिभिः प्रतिकर्मलोपमेकैकाज्याहुतिभिःकार्येति॥ ॥अथोपनयनं॥ ॥तत्रगर्भाष्टमेवा
ष्टमेवाब्देकार्यं॥ माघादिपंचमासुशुभेरवलावंधनंशिशोः॥ ज्येष्ठमासेनचज्येष्ठ
स्यजन्ममासेनसर्वेषां॥शुक्लपक्षोद्वितीयादिस्वाध्यायतिथिषुनानध्यायेननैमित्ति
कानध्यायेप्रवाहिशुभमुहूर्तेशुभंवंशदोगुरुशुक्रयोर्बाल्यवार्द्धिकास्तराहित्यादे
ज्योतिर्विदोक्तेशुभकालेउपनयनंकार्यं॥उपनयनेतुक्रममाह॥ ॥वृद्धगार्ग्यः॥ ॥पितापि
तामहोभ्राताज्ञातयोगोत्रजाग्रजाः॥उपानयेधिकारीस्यात्पूर्वाभावेपरःपरः॥ पितै
वोपनयेत्पुत्रंतदभावेपितुःपिता॥ तदभावेपितुर्भ्रातातदभावेतुसोदरः॥ अधिकारसि
द्धयेप्रायश्चित्तमाह॥ वृद्धपितुः॥ ऊर्ध्वंत्रयंवोपनीतात्रीन्कृच्छ्रांश्चबटुंवरेत्॥ आश्व
यंद्वादशसहस्रंगायत्रींचजपेत्॥ तथा॥ नांदीश्राद्धेकृतेपश्चादनध्यायस्त्वकालिकः॥ शिव ॥१४॥

मौंजीबंधंनदाकुर्यादेदारंभंनकारयेत्॥ अकालिकः॥गर्जनिर्घातादिनिमित्त
कः॥आश्वलायनानामुपनयनादिदिनेवेदारंभाभावाद्वेदारंभकरणंचयजुर्वे
दिविषयं॥आश्वलायनस्तुरद्विश्राद्धादिनाछद्दिनमध्येमुहूर्त्तांतरसत्तिते
नांदीश्राद्धेनतत्रोपनयनंकुर्यात्॥ तदूर्ध्वंतुमुहूर्तेश्राद्धांतरपूर्वकमुपनय
नंयथाकालंकुर्यात्॥ तथाप्रायश्चित्तंकार्यं॥ पितामममउपनेकर्तृत्वाधिकार
सिध्यर्थंकृच्छ्रत्रयंद्वादशसहस्रंगायत्रीजपंचयथाप्रत्याम्नायेनयथाकालंकरि
ष्ये॥ तथाकुमारेणापि॥कामचारकामवादकामभक्षणादिदोषापनोदार्थंकृ
च्छ्रत्रयंयथाप्रत्याम्नायेनयथाकालंकरिष्ये॥ ततःसुमुखश्चेत्यादिगणपतिस्म
रणपूर्वकंदेशकालौस्मृत्वाममास्यकुमारस्यद्विजत्वसिध्यावेदाध्ययना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धिकारार्थं चौलमुपनीत्यासहकरिष्ये॥ तदंगं स्वस्तिपुण्याहवाचनं मातृकापूजनं नांदीश्राद्धं मंड ।१५॥
पप्रतिष्ठां कुलदेवतादिस्थापनं च करिष्ये॥ स्वस्तिवाचननांदीश्राद्धं कृत्वा॥ आचारप्राप्तं अविघ्न
संज्ञं गणपतिं पूजयित्वा॥ नंदिनीनलिनीमैत्राउमाच पशुवर्धिनी॥ भगवतिमावाहयामि॥ नंदि
न्यादिभ्यो नमः॥ आसनं॥ पाद्यं॥ अर्घ्यं॥ आचमनीयं॥ ततो॥ नीराजनं॥ ॐ श्रिये जातः श्रिय आ
निरियाय०॥ कः कू॥ कनिक्रदज्जनुषंप्रब्रुवाणः०॥ वर्गः॥ सुमंगलसूक्तेन तैलहरिद्रा॥ उष्णोद
केन स्नापयित्वा॥ समुद्रज्येष्ठा इति च तस्त्रभिरापोहिष्ठेति तिसृभिः सर्वासां शुद्धोदकेन प्रो
क्ष्य॥ ओं दधिक्राव्णो अकारिषं० ऋक्॥ कांडात्कांडादिति ण्दूर्वा॥ गंधपुष्पधूपदीपनैवेद्यद
क्षिणांतोपचारैः पूजयेत्॥ तत आग्नेयीमारभ्य ईशानीपर्यंतं मंडपस्थूणायां नंदिन्यादि
चत्वारि देवताः क्रमेण स्थापयेत्॥ मंडपमध्ये पशुवर्द्धिनीं स्थापयेत्॥ गृहमध्ये भगवती
यथाचारं स्थापयेत्॥ तदस्तु मित्रावरुणा गृहावेप्रतिष्ठा॥ ततो यथामीलितोपचा
रैः पूजयेत्॥ पुष्पांजलिं दत्वा क्षमाप्य॥ कुलदेवताप्रीत्यर्थं सुवासिनीभ्यः तैलहरिद्रा ॥१५॥

दिस्नानमहं करिष्ये॥ यथाचारं सर्वं कार्यं॥ ततः कृतमांगलिकः स्नानः देशकालौ संकीर्त्य॥ अस्य
कुमारस्य बीजगर्भसमुद्भवैनोनिबर्हणबलायुर्वर्चोभिवृद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं कल्पितं
चौलाख्यं कर्म करिष्ये इति संकल्प्य॥ स्थंडिलादि अग्निध्यानांतं कृत्वा पुनर्देशकालौ संकीर्त्य
अस्मिन् चौलाख्यकर्मणि देवतापरिग्रहार्थमन्वाधानं करिष्ये॥ अस्मिन्नन्वाहितेग्नाविध्मा
दि आघारांतैरौ मुक्त्वात्र प्रधानं॥ त्रिरग्निं पवमानं प्रजापतिं चाज्यद्रव्येण मध्ये उंदनतंत्रे शात्रौ
ए बैब स्विष्टकृतमित्यादि सद्यो यक्ष्ये॥ समिद्धय मग्नावाधाय॥ परिसमूहनादि पूर्णपात्रनिधा
नांतं कृत्वा पद्धातंत्र प्रयोगादि तंत्रं कृत्वा॥ अग्नेरुत्तरतः ब्रीह्यादिशराव चतुष्टयं निधा
याग्नेर्दक्षिणतः॥ एकस्मिन् शरावे शमीपर्णानि द्वितीयानडुहं गोमयं मातुः समीपे निधाय॥
ततो ब्रह्मण एकविंशति कुशपिंजूलान्यादाय मातुर्दक्षिणतस्तिष्ठेत्॥ पिता वा तथा तिष्ठेत्॥
अस्मिन्पक्षे न्यग्वचौलकर्त्तोलतः कुमारेणान्वारब्धः॥ कर्त्तापुरस्तन्माघारांतैरौ कर्म कृत्वा॥
प्रधानहोमं कुर्यात्॥ अग्न आयूंषि पवसे० स्वाहा॥ अग्नये पवमानायेदं॥ ततो उष्णेन वायउदकेन हि
पृग्राप्तद्वारां गृहीत्वा॥ ततो नवनीतेन वासः कर्णमारभ्य शिरः स्त्रीक्लेदनं कुर्यात्॥ तत्र मंत्रः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अदितिः केशान्वपत्वाप उदं तु वर्चसे॥एकविंशति कुशपिंजूलानां मध्ये त्रीणि पिंजूलान्यादाय
॥१६॥ दक्षिण कर्णमूलभागे निधाय॥ॐ ओषधे त्रायस्वैनं॥अनेन कुशां कुशं निधाय॥स्वधिते मैनं हिंसीः॥
तदुपरि क्षुरं निधाय॥येनावपत्सुषान् जरदष्टिर्यथासत्॥सकेशानि छित्वा शर्वीग्यानू शमीपर्णी
युतानूमातृहस्ते दत्त्वा माता गोमयोपरि निधाय पुनस्तथैव मंत्रेण द्विवारं कार्यं॥येन धाता बृहस्पते
रग्नेरिंद्रस्य चायुषेवपत्॥तेन त आयुषे वपामि सुश्लोक्याय स्वस्तये॥इति द्वितीयं॥येन भूयश्च रा
त्र्यां ज्योक् च पश्याति सूर्यं॥तेन त आयुषे वपामि सुश्लोक्याय स्वस्तय इति तृतीयं॥सर्वैर्मंत्रैश्च तुर्थं॥
एवं वामकर्णे त्रिवारं कर्तव्यं॥न तु च तुर्थं॥यत्क्षुरेण मर्चयता सुपेशसा वप्ता वपसि केशान्॥शुंधि सि
शिरो मास्यायुः प्रमोषीः॥अग्नत आरभ्यामूलात् क्षुरधारां निमज्जेत्॥ततः शीतोष्णाद्भिरर्थं कु
र्णेनाक्षुण्वन्कुशली कुरु॥नापितं प्रतिब्रूयात्॥नापितेन यथाचारं शिखास्थापितवपनं कृत्वा॥शि
रोच्छेदः स्नानं कुर्यात्॥स्विष्टकृतादि होममंत्रैः समापयेत्॥ब्राह्मणाय अनडुहप्रतिनिधिभूतं द
क्षिणां दत्वा ब्राह्मणान्भोजयित्वा भूयसीं दत्वा॥कर्मेश्वरार्पणं कृत्वा॥नापिताय ब्रीह्यादिपा
त्रं च तुष्टपदं धात्॥यस्य स्मरसे सुक्ता विकुंनमस्त्स्यए तत्सर्वं कुमार्योऽप्य मंत्रकं होमस्तु सम ॥१६॥

समंत्रक इति॥मध्ये शिरसि चूडास्याद्वासिष्ठानां तु दक्षिणे॥उभयोः पार्श्वयोरत्रिक
श्यपानां शिखा मता॥शिरो मति रिगर्भिण्यां चूडाकर्म न कारयेत्॥पंचमाब्दाद
थोर्ध्वं तु गर्भिण्यामपि कारयेत्॥सहोपनीत्या कुर्याच्चेत्तदा दोषो न विद्यते॥ ॥
॥इति चौलकर्मप्रयोगः॥ ॥ततो बटुमात्रा सह भोजनं कृत्वा॥आचार्यः॥म
मास्य कुमारस्योपनयं कर्तुं तत्राच्यां गभूतं वापनादिकरिष्ये॥ततो स्नात्वा
लंकृत्य कुलदेवतां नमस्कृत्य॥आचार्यसमीपमागत्य मुखं सम्यगीक्षेत्॥ततः
आचार्येण स्वदक्षिणभागे बटुमुपवेशयेत्॥येयज्ञेनेति वर्गपिंचकं सूक्तं ब्राह्म
णाः पठेयुः॥तदस्तु मिति पठित्वा॥आचम्य प्राणानायम्य सुमुखश्चेत्यादि गण
पति स्मरणपूर्वकं देशकालौ संकीर्त्य उपनयनांगभूतं स्थंडिलादिकरिष्ये॥उल्ले

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

खनादिअग्निध्यानांतं कृत्वा पुनर्देशकालौ संकीर्त्यास्य कुमारस्य द्विजत्वसि
॥१७॥ ध्यर्थं क्रियमाणे उपनयनहोमे देवतापरिग्रहार्थमन्वाधानं करिष्ये ॥ अस्मिन्न
न्वाहिते ग्नौ वित्यादि आघारावाज्यभागेनेत्यंतमुक्त्वात्र प्रधानं त्रिरग्निं पवमानं
प्रजापतिं चाज्येन शेषेण स्विष्टकृतमित्यादि सद्यो यक्ष्ये त्यंतमुक्त्वा ॥ व्याहृति
भिरग्न्याधाय परिसमूहनाद्याज्यसंस्कारांतं कृत्वा ॥ अत्र कारिका ॥ आज्य
संस्कारपर्यंतमुपलेपादिपूर्ववत् ॥ परिधानं देस्य वाससैवाहतेन तु ॥ आचार्यो भवे६
ऽग्नेः पश्चादवस्थाय कुमारं प्राङ्मुखमवस्थाप्याहतेन वाससा संवीतं कौपीनं धारये
त् ॥ तत्र मंत्रः ॥ युवं वस्त्राणीत्यस्य औचथ्यो दीर्घतमा मित्रावरुणौ त्रिष्टुप् ॥ वासो ॥१७॥
धारणे विनियोगः ॥ ॐ युवं वस्त्राणि ऋ० १ प्रावरणार्थं काषायवस्त्रं कृष्णाजिनं वा धा

रयेत् ॥ तच्च त्र्यंगुलं तु बहिर्लोममयं तस्याश्चतुरंगुलं स्त्री अजिनं धारयेद्द्विप्रश्चतुर्विंशाष्टषोडशैः ॥
मित्रस्य चक्षुरित्यस्य वामदेवो जिनं त्रिष्टुप् ॥ अजिनधारणे विनियोगः ॥ मित्रस्य चक्षुर्धरु
णं बलीयस्तेजो यशस्वि स्थविरं समिद्धं ॥ अनाहनस्यं वसनं जरिष्णु परीदं वाज्यजिनं दधे
हं ॥ ततो यज्ञोपवीतमित्यस्य परब्रह्म ऋषि परमात्मा देवता त्रिष्टुप् छंदः ॥ श्रौतस्मार्तक
र्मानुष्ठानसिध्यर्थं यज्ञोपवीतधारणे विनि० ॥ यज्ञोपवीतं परमं पवित्रं० ऋक् ॥ इति मंत्रं
वाचयित्वा धारयेत् ॥ कुमारमात्मनोऽग्नेश्च मध्येन यज्ञपात्रांतरमागमयित्वा ॥ तत्र
विधिवदाचमेप्य पुनस्तथैवानीय स्वदक्षिण उपवेश्य बर्हिरास्तरणादि स्रुवसंमा
र्जनांतं कृत्वा ॥ ब्रह्मचार्यन्वारब्धः इध्माधानाद्याघारांतं कुर्यात् ॥ अग्न आयूंषि प
वस इति तिसृणां शतं वैखानसा ऋषयः ॥ अग्निः पवमानो देवता गायत्री छंदः ॥
उपनयनप्रधानआ० ॥ अग्न आयूंषि पवसे० ऋक् ॥ अग्निर्ऋषिः० ऋक् ॥ अग्ने पवस्व पा० ऋक् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रजापतेनत्वदेवता०ऋक्।।चौलवच्चतुर्भिराज्याहुतिर्हुत्वा।।यथाक्रमेणत्यागंकुर्यात्।।
अथाचार्यउत्तरतोग्नेः प्राङ्मुखस्तिष्ठेत्।।कुमारोप्यग्नियाचार्ययोर्मध्येनगत्वा॥
॥१९॥ चार्यस्याभिमुखस्तिष्ठेत्।।अथाचार्यःसंयतात्मासवितृदेवताप्रीयतयेंजलिक्षा
रणंकुर्यात्।।तत्रआचार्यःशुद्धोदकेनशिष्यांजलिमापूर्यस्वस्यांजलिमन्येन
पूरयित्वा।।तत्सवितुरित्यस्यशावाश्वःसवितानुष्टुप्।।अवक्षारणेवि०।।तत्सवि
तुर्वृणीमहेवयं०ऋक्।।अनेनस्वांजल्युदकंशिष्यांजलावावक्षार्य।।तज्जलंकुमा
रांजलिनैवावक्षारयेत्।।असौअमुकशिष्यत्वसिध्यर्थं।।ततोबटोर्हस्तंगृहीत्वा।। ॥१९॥
तत्रमंत्रः।।देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांहस्तंगृह्णाम्यमु
कशर्मन्नितिकुमारस्याभिवादनिकेनामग्रामंतिसंबुध्यनिर्दिश्य।।स्वदक्षिणह
स्तेकुमारस्यसांगुष्ठंदक्षिणपाणिंगृहीत्वापुनरपिपूर्ववत्।।उदकपूरणादिद्वि

वारंकुर्यात्।।तत्रसवितातेहस्तमग्रभीत्।।असावितिद्वितीयं।।हस्तग्रहेमंत्रः।।अग्निराचार्यस्तवेतितृ
तीयंहस्तग्रहेमंत्रः।।अथाचार्यःब्रह्मचारिणासहनिष्क्रम्यसवत्सवितरेषतेब्रह्मचारीतंगोपाय।।स
मामृतइत्युच्चार्य।।ब्रह्मचारिणामादित्यमीक्षयेत्।।ततउक्त्वापिपूर्ववदुत्तरतोग्नेरन्योन्याभिमुखौ
तिष्ठेतां।।अथाचार्यः।।कस्यब्रह्मचार्यसि।।प्राणस्यब्रह्मचार्यसि।।कस्त्वाकमुपनयते।।कायत्वापरि
ददामि।।इतिमंत्रंजप्त्वा।।युवासुवासाइत्यस्यकौशिकोविश्वामित्रोस्त्रिष्टुप्।।पूर्वार्द्धस्यप्रदक्षिणावर्त र्तेप
नेउत्तरार्द्धस्यपाणिभ्यांबद्धुहृदयालंभनेवि०।।युवासुवासाःपरि सूप वीतआगात्०ऋक्।।ततःआचा
र्यः।।आत्मानमग्निंत्वांतरेणबटुनीत्वास्वदक्षिणउपवेशयेत्।।ततोबटुःपरिसमूहनपर्युक्षणंकृ
त्वा।।समिधमवदाय।।अग्नयेसमिधमित्यस्यहिरण्यगर्भोग्निर्बृहतीसमिदाधानेविनि०।।अग्नयेसमि
धमहार्षंबृहस्पतेजातवेदसे।।तयात्वमग्नेवर्धस्वब्रह्मणावयंस्वाहा०।।अग्नयइदं०।।ततःपाणिंप्रक्षाल्या
ग्निमुपस्पृश्य।।तेजसामासमनज्मीतिसंस्कृतोष्टद्वयंमुखमवाङ्गं।।म०अन्यपाणिंप्रक्षाल्यतथैवद्विवारंकुर्या
त्।।ततःस्तिष्ठन्।।मयिमेधामितिषण्णांहिरण्यगर्भऋषिः।।पूर्वेषांत्रयाणामग्नींद्रसूर्यदेवताउत्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आचार्यं परिक्रम्य का वामपाणिमुत्तानीकृत्य दक्षिणपाणिं सम्मुखीकृत्य संधाय पूर्णाणि एवं मांगुष्ठी वांगुष्ठौ बद्धौ ह्री कृ
कृतं ब्रह्मांजलिं दक्षिणांके निक्षिप्य आचार्यांतिक आसीतः यथा वार्यस्तदंजलिं तत्परिधानीयवा समाच्छाद्य स्वपाणि
॥११॥ रत्नयाणामग्निर्देवता गायत्री छंदः। अग्न्युपस्थाने०। मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु॥ मयि
मेधां मयि प्रजां मयींद्र इंद्रियं दधातु॥ मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु॥ यस्ते अग्ने तेजस्ते
नाहं तेजस्वी भूयासं॥ यत्ते अग्ने वर्चस्तेनाहं वर्चस्वी भूयासं॥ यत्ते अग्ने हरस्तेनाहं हरस्वी भूयासं॥ इति
वर्णमंत्रैरग्निमुपस्थाय॥ मानस्तोक इत्यस्य कुत्सो रुद्रो जगती विभूतिग्रहणे वि०। मानस्तोके तनये०॥ कृ कृ॥
अनेन मंत्रेण भस्ममादाय॥ यथाचारं। त्र्यायुषं जमदग्नेः ललाटे। कश्यपस्य त्र्यायुषं कंठे। अगस्त्यस्य
त्र्यायुषं नाभ्यां। यद्देवानां त्र्यायुषं दक्षिणस्कंदे। तन्मे अस्तु त्र्यायुषमिति वामस्कंदे। शतायुषमिति शि
रसि। भस्म धारयेत्॥ पुनः परिसमूहन पर्युक्षणे कृत्वा कृतांजलिस्तिष्ठन्नोच मेस्वरस्वमेय ज्ञोपस०।
नमो नमः॥ इत्यग्निमुपस्थाय॥ ततो गायत्र्युपदेशं कुर्यात्॥ अमुकगोत्रोऽमुकशर्माहं भो गुरो अभि
वादयामि सुच्चारयन्॥ शिरोवनतिपूर्वकमभिवाद्य आचार्यो यथायुष्मान् भव सौम्य देवदत्तशर्मा॥ ॥१०॥
अ०। अत्र मनुराह। आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने॥ अकारश्चास्य नाम्नोंऽते वाच्यः
पूर्वाक्षरः प्लुतः॥ सवित्र्युपदेशो वाछंनधीहि भोः। सावित्रीं भो अनुब्रूहि। तस्यकाससापाप्यां च
पाणी संगृह्य सावित्रीमन्वाह यच्छो दुर्वराः सर्वीलत्र कारिका। ॐ भूर्भुवः स्वः पूर्वां सावित्रीं वाचये
त्पाणींदंजन्किं परिगृह्य प्रणवव्याहृतिपूर्वकं सावित्रीं प्रथमं पादशः स्वयमुक्त्वा वाचयेत्॥ ततोऽर्धर्चशस्ततः सर्वा। एवंयदि
णाशक्तो यथाशक्ति स्वयमुक्त्वा वाचयेत्॥ तथा प्या। प्रणवस्य परब्रह्मऋषिः परमात्मा देवता गायत्री छंदः। व्याहृ

दथ॥ पादं पादं च सावित्र्याः स्वयमुक्त्वा वाचयेत्॥ ततस्त्वर्धर्चमर्धर्चं सर्वां तामथ वाचयेत्॥ एवं वक्तुमशक्तश्चेत्तं
यथाशक्ति वाचयेत्॥ प्रणवस्य परब्रह्म ऋषिः परमात्मा देवता देवी गायत्री छंदः व्याहृतिमंत्रस्य प्रजापतिः प्र
जापतिर्बृहती॥ गायत्र्या विश्वामित्रः सविता गायत्री उपनयने वि०॥ गायत्रीं वाचयित्वा॥ मम व्रत इति मंत्रस्य
प्रजापतिर्ऋषिर्बृहस्पती। देवता त्रिष्टुप् छंदः॥ वटो हृदये ऊर्ध्वांगुलिपाणिनिधाने वि०॥ ततः मम व्रते हृद
यं ते दधामि॥ मम चित्तमनु चित्तं ते अस्तु॥ मम वाचमेकव्रतो जुषस्व॥ बृहस्पतिष्ट्वा नियुनक्तु मह्यं॥ स्व
पाणिं ऊर्ध्वांगुलिं ब्रह्मचारिणो हृदयदेशे निधाय॥ मेखलां बध्नीयात्॥ इयं दुरुक्तादिति द्वयोर्वामदे
वो मेखला त्रिष्टुप्॥ मेखलाबंधने वि०॥ इयं दुरिक्तात्परिबाधमाना वर्णं पवित्रं पुनती न आगात्। प्रा
णापानाभ्यां बलमाभरंती प्रिया देवानां सुभगा मेखलेयं॥ ऋतस्य गोप्त्री तपसः परस्पी घ्नती रक्षः
सहमाना अरातीः॥ सा नः समंतमनु परेहि भद्रया भर्तारस्ते मेखले मा रिषामेति मेखलां ब
द्ध्वा॥ पालाशं दंडं दद्यात्॥ स्वस्ति न इत्यस्य स्वस्त्यात्रेयो विश्वेदेवास्त्रिष्टुप्॥ दंडदाने वि०॥ ॐ स्व
स्ति नो मिमीता०॥ कृ कृ॥ ततो बटोस्तद्ग्रहणे मंत्रः॥ अदांतं दमयित्वा मां मार्गे संस्थापयस्व यं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दंडः कारेस्थितोपस्थात्तस्माद्दक्षतोभपामिति वाचयेत् ॥ ततः कुमारस्या चार
मादित्रोत् ॥ ब्रह्मचार्यसि ॥ आचमनं कुरु ॥ आपोशानं कुरु ॥ मूत्रपुरीषादौ शुध्य
र्यमित्यर्थः ॥ कर्म कुरु ॥ सध्योपासनादी त्यर्थः ॥ दिवा मास्वाप्सीः ॥ आचार्याधी
नो वेदमधीष्व ॥ सायं प्रातर्भिक्षेथाः ॥ सायं प्रातः समिधमाधेहि ॥ द्वादशवर्षाणि
वेदग्रहणांतं वा ॥ ब्रह्मचर्यं चरेति ॥ प्रैषार्थं वाचबोधयेत् ॥ ततोस्तिष्टकृदादि हो
मशेषं समाप्याग्निमेधाजननांतं कुर्यात् ॥ तत्रैव सायं प्रातरग्निकार्यं कुर्यात् ॥ ततो
नुप्रवचनीयहोमब्राह्मणभोजनपर्यायं संतंदुलरूपां भिक्षां याचेत ॥ तत्रक्रमः ॥
भिक्षापात्रएमो होमानर भवती। निभिक्षां ददात्विति ॥ अथवापितरं भिक्षां भवान्ददा
त्विति पितर एवं मातुः स्वसारं भगिनीमन्यानपि बांधवानप्यारव्याप्तिनी श्रावा
वयित्वा भैक्षमाचार्याय निवेदयमध्याह्न संध्यां कुर्यादिति प्रयोगपारिजाते नोतिकु
मही कारः ॥ ब्राह्मणाशिषग्रहणं दु प्रतिनेश्रातं वाविप्राउपनयनेभोज्याः ॥ ततो गु
रुसंनिधावपलक्षितं दिनशेषं नीत्वा सायं वंदितसंध्योपनयनाग्निका २०

र्येशतिकआसीनः प्राणानायम्य सायमग्निकार्यं करिष्ये इति संकल्प्य परिसमु
ह्यपर्युक्ष्य पूर्ववत्समिधमाधायाग्निमुखं पूर्ववद्दवमृज्योत्कृष्णमग्नेरग्निमुपस्था
पमानस्तोक इति मस्माद्भपआयुषमिति त्र्यायुषेणानेषु पूर्ववद्धृत्वा पुनः परिस
मूहनपर्युक्षणे कृत्वा कृतांजलिस्तिष्ठ भो नमइत्युपतिष्ठेत ॥ अथवाचार्योस्ताम्
नेग्नेः पश्चात्त्वासीनः प्राणानायम्य ब्रह्मचारिणं दक्षिणतउपवेश्याति थ्यादि
संकीर्त्य उपनयनांगभूतं अनुप्रवचनीयहोमं करिष्ये इति संकल्प्याज्यमा
णे अनुप्रवचनीयहोमे देवतापरिग्रहार्थमन्वाधानं करिष्ये अस्मिन्नन्वाहिताग्नौ
वित्याद्याघारावाज्येनेत्यंतमुक्त्वा सदसस्पतिं सावितारं ऋषीन्इति प्रधानदेव
ताश्चरुद्रव्येण शेषेणस्विष्टकृतमित्यादिसद्यो यक्ष्ये इत्युक्त्वा मित्यादिसद्यो यक्ष्ये
इत्यंतमुक्त्वा भूर्भुवः स्वः स्वाहेति हुत्वा समिधौ हुत्वा परिसमूहनादि प्रणीताप्रणयनांतं कृ
त्वा तद्भिक्षाद्रव्यं चतुरश्चान्तरोमुष्टीन् सं देवताभ्यः स्वाविश्वत्रयप्रभोजनस्य चर्प
र्याप्तांनिरूप्यत् सो प्रोक्ष्यात्रिः फलीकृत्येति प्रक्षाल्य श्रपयित्वाभिन्नस्ता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लीपाकृत्वा वार्यापत्तिं वेदयेद्वटुः बटोरेवं करणाशक्तौ तद्बंधुनाम्नेन वा कारयेत्॥
ततो ब्रह्मचारिणा चाग्न्योगुरुणाज्यसंस्काराद्याघारांतं कृत्वा प्रधानहोमं कुर्यात्॥ अ
वदानधर्मेण वदय॥ सदसस्पतिमित्यस्य काण्वोमेधातिथिः सदसस्पतिर्गायत्री॥
अनुप्रवचनीयप्रधानहवे होमे विनियोगः॥ ॐ सदसस्पतिमद्भुतं०॥ स्वाहा सदसस्प
तय इदं०॥ तत्सवितुरित्यस्य गाथिनो विश्वामित्रः सविता गायत्री॥ विनियोग उक्त
वत्॥ ॐ तत्सवितु०॥ स्वाहा सवित्र इदं०॥ ऋषिभ्यः स्वाहा॥ ऋषिभ्य इदं०॥ एवं त्रि
भिर्मंत्रैर्हुत्वा स्विष्टकृदादिहोमशेषं समापयेत् दक्षिणाश्चैव वरान् ब्राह्मणान्भोजयि
त्वा तैर्वेदसमाप्तिं वाचयेत्॥ ततो ब्रह्मचारी अक्षारलवणमन्नं भुक्त्वाधःशायी तमेधा
जननं यावदेवमेव गुरुः प्रसादयन्वर्तेत यद्युपसर्गजनाद्यनध्यायशंकोतदादिवेव वरुः अ
पयेत्॥ होमस्तु सायं संध्योत्तरमेव॥ तदानानध्यायदोषः॥ तदुक्तं संग्रहे॥ सनंध्यागर्जि
ते कालेनव ध्युत्यानद्भाषिते॥ ब्रह्मौदनं पचेदग्नौप कर्मये निवर्तते तथा। ब्रह्मौद श्रीहरस्य
नं पचेदाग्नि पकर्मन्नं तेतु ष्यति॥ तथा चोपनयनानुप्रवचनीयचरुश्रपणयोरंतरा ॥२७॥

२८

नानध्यायेपुनरुपनयनं॥ एष प्रयोगः॥ स्वस्वकालकृतपूर्वसंस्कारस्य असंस्कृतस्य
तु विशेष उच्यते॥ आचार्यउपनेता सर्वदिने वटुनासह मंगलस्नातः प्राणानायम्य तिथ्या
दि संकीर्त्य मम कुमारस्य गर्भाधानपुंसवनसीमंतजातकर्मसंस्कारेषु वा जातकर्मनामकर
णनिष्क्रमणान्नप्राशनचौलकर्मांतानां नवसंस्काराणां कालातिपत्तिदोषपरिहारार्थं श्री
परमेश्वरप्रीत्यर्थं प्रायश्चित्तहोमं करिष्य इति संकल्प्य उपलेपनादि पूर्णपात्रनिधानां
तं कृत्वा विधिवदाज्यं संस्कृत्याघारांतं कृत्वातीतकर्मसंख्यया भूर्भुवस्वः स्वाहेति आज्या
हुतीर्हुत्वा स्विष्टकृदादिहोमशेषं समापयेत् चौलातिरिक्तसंस्काराणां प्रमादादकरणे प्रत्येकं पा
दकृच्छ्रं चौलाकरणे अर्द्धकृच्छ्रं बुद्धिपूर्वं चौलातिरिक्ताकरणे प्रत्येकमर्द्धकृच्छ्रं चौलस्यैकेपि
कृच्छ्रं वटुना कारयेत्॥ अशक्तौ तत्साम्नायत्वेन गोदानं तिलाहुतिसहस्रं दशसहस्र
गायत्रीजपद्वादशब्राह्मणभोजनादि द्वैकैकं प्रायश्चित्तं कृत्वातीतानि जातकर्मादी
नि कृत्वा पूर्वोक्तप्रकारेण उपनयनं तंत्रेण सर्वमाचरेत्॥ उपनयनेन सह चौलकरणपक्षे पू
र्वेद्युः संस्काराद्वयं संकीर्त्य युगपत्स्वस्तिवाचनमहपन नांदीश्राद्धानि कृत्वा परेद्युर्मंग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२२

क स्नानादि श्रीस्यादिपात्र वटु स्पृशानां तं पूर्वोक्त चौलप्रयोगं संवर्ष्ट्य स्वा पुनस्तिथ्या
दि संकीर्त्य उपनयनसंकल्प्याद्यनुप्रवचनीय होमांतं सर्वं कार्यं ॥ इत्युपनयनप्रयोगः ॥
अथ मेधाजननप्रयोगः ॥ प्रागुक्त क्रमेण कृतव्रतस्य ब्रह्मचारिणो मेधासिध्यर्थं आ
चार्यश्चतुर्थदिवसे मेधाजननाख्यं कर्म कुर्यात् ॥ तत्रायं क्रमः ॥ प्रत्यग्वायव्योदक् प्रागु
दक् पूर्वान्यतमस्यां दिशि शाखावर्जितं पलाशं तदभावे कुशस्तंबं वा तदसंभवे स्वगृहे
शान दिग्भागे सर्वतो द्वात्रिंशांगुलां त्रिमेखलां वेदिं कृत्वा तस्यां पात्रां कुरसमन्वितामृ
द्रीं पलाशशाखां समूलं कुशस्तंबं वा प्रतिष्ठाप्य ब्रह्मचारिणान्वारब्धः संकल्पपूर्वकं
पूजां कुर्यात् ॥ तत्रायं क्रमः ॥ तिथ्यादि संकीर्त्य मम कुमारस्योपनयन व्रतसमाप्ति
दग्रहण सामर्थ्य लक्षण मेधासिद्धि द्वारा श्रीपरमेश्वरप्रीत्यर्थं मेधाजननाख्यं क
र्म करिष्ये इति संकल्प्य पलाशशाखां मेधायै नम इति नाममंत्रेण वाह्नाद्युप
चारान्कृत्वा वकस्तकुमोदकामिश्रमन्नं निवेद्य पुनश्च पूर्ववदभ्यर्च्य ब्रह्मचारिणा
प्रणम्याप्यशुद्धजलपात्रोदकेन सेवनं कुर्वता वटुना त्रिः प्रदक्षिणा कारयन्मं २२ २५

त्रं वा जपेत् ॥ प्रणामयेच्च ॥ ॐ सुश्रवः सुश्रवा असि यथा त्वं सुश्रवः सुश्रवा अ
स्येवं मां सुश्रवः सौश्रवसं कुरु ॥ यथा त्वं देवानां यज्ञस्य निधिपोस्येवमहं मनुष्याणां
वेदस्य निधिपो भूयासमिति प्रतिप्रदक्षिणं मंत्रावृत्तिः प्रणामं च कारयेत् ॥ ततो ब्र
ह्मचारी स्नात्वा नवान्यज्ञोपवीताजिनमेखलादंडाननुपनयनवत्समंत्रकं धृत्वा पुरा
णानि पलाशसंनिधौ विसृज्य पूर्ववद्धृतवासा सौ गुरवे दत्वा मेधामह्यमिति सूक्तं वि
भिः पाठयित्वा विधिवत्स्वस्तिवाचनं कृत्वा ब्राह्मणेभ्यो दक्षिणां यथाशक्ति दत्वा तान्
भोजयित्वा नमस्कृत्याशिषो गृह्णीयात् ॥ अथ मेधामह्यमिति सूक्तं ॥ ॐ मेधामह्यमंगिरसो
मेधां सप्तऋषयो ददुः ॥ मेधामिंद्रश्चाग्निश्च मेधां धाता ददातु मे ॥ मेधां ते वरुणो राजा मेधां
देवी सरस्वती ॥ मेधां ते अश्विनौ देवावाधत्तां पुष्करस्रजा ॥ या मेधाप्सरःसु गंधर्वेषु च
यन्मनः ॥ दैवी या मानुषी मेधा सा मामाविशतादिमां ॥ यन्मे नोक्तं तद्रमतां शकेयं यदनु
ब्रुवे ॥ निशामितं निशामपि व्रतं सह व्रतेन भूयासं ब्रह्मणा संगमेमहि ॥ शरीरं मे विचक्ष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ण वाऽग्निं मधुमद्गृहा॥ अपरं इदमहं मत्सोऽस्मर्यो ब्रह्मणानी स्वच्छक्र तं मे मा महासीः॥ मेधां दे

वीं मनसा रेजमानां गंधर्वजुष्टां प्रतिनो जुषस्व॥ मह्यं मेधां वदमह्यंग्निपं वदमेधा वी
भूया सम जरीजरिष्णुः॥ सदसस्पतिमद्भुतं प्रियमिंद्रस्य काम्यं॥ सनिं मेधामयासिषं॥ मेधा
देवगणाः पितरश्च उपासते॥ तया मामद्य मेधयाग्ने मेधाविनं कुरु॥ मेधा व्य१हं सुमनाः सु
प्रतीकः श्रद्धामनाः सत्यमतिः सुशेवः॥ महायशा धारयिष्णुः प्रयुक्ता भूयासमस्य स्वधया श्री ९५
प्रयोगे॥ ॥ इति मेधाजननांत उपनयनसंप्रयोगः॥ अथ महानाम्न्यादिव्रतानि॥
२३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=16.09.19 14:03
,TRANSFERRED=2019/09/16 at 14:09:44
,PAGES=25
,TYPE=STD
,NAME=S0001832
,Book Name=M-211-DHARMSHASTRA NIRNAY
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection